E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.321

केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
देवभूमि-सौरभम्
E-ISSN 2584-2870
Devabhūmisaurabham

Vol 3 Issue 1 Jan-June 2026 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# सिद्धान्तरत्नाकर-कौमुदीमूलार्थविद्योतिनीदृष्ट्या समासशक्तिविचारः

डॉ. श्रीओम शर्मा
सहायकाचार्यः, व्याकरणविद्याशाखा
श्रीभगवानदास-आदर्शसंस्कृतमहाविद्यालयः,
हरिद्वारम्।
मो.-8899187929
अणुवाक्-shriomsharma2012@gmail.com

## शोधसारः (Abstract)

**सिद्धान्तरत्नाकरस्य परिचयः**— तत्त्वबोधिनीवदयमपि वैयाकरणसिद्धान्तकौमुद्याः टीकाग्रन्थो वर्त्तते। अस्य प्रणयनं पं. श्रीरामकृष्णभट्टेन सप्तदशशताब्द्याः पूर्वार्धे कृतम्। अद्यत्वे अयं ग्रन्थः स्वरवैदिकीं विहाय सम्पूर्णोपलभ्यते। अस्य ग्रन्थस्य सम्पादनं प्रो.आजादमिश्रेण कृतम्। राष्ट्रियसंस्कृतसंस्थाने ग्रन्थोऽयमुपलभ्यते।

**कौमुदीमूलार्थविद्योतिन्याः परिचयः** — अस्याः टीकायाः प्रणेता मैथिलविद्वान् महावैयाकरणो पं.दीनबन्धुझा वर्त्तते। अस्यास्सम्पादकः विद्यावाचस्पतिः 'डॉ.शशिनाथझा' अस्ति। ग्रन्थोऽयं 1986 तमे ख्रीष्टाब्दे कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयतः प्रकाशितोऽस्ति। अयं ग्रन्थः अपूर्णः प्राप्यते। सञ्ज्ञाप्रकरणात् कारकान्तभाग एवोपलभ्यते। तत्रापि अजन्तपुँल्लिङ्गे जरसशब्दात् स्त्रीप्रत्ययपर्यन्तः मध्यभागो नैव प्राप्यते। फक्किकाप्रकाशवदयं ग्रन्थो वर्त्तते।

समासशक्तिविषये वैयाकरणभूषणसारे मञ्जूषायां व्याकरणस्यार्थिकग्रन्थेषु च महान् विचारः वर्त्तते। वैयाकरणाः समासेऽपि (समुदायेऽपि) शक्तिं स्वीकुर्वन्ति,नैयायिकाः इदं मतं नाङ्गीकुर्वन्ति,ते वदन्ति यत् यदि अवयवशक्त्यैवार्थबोधः स्यात् तर्हि समुदाये शक्तिः किमर्थं स्वीकर्त्तव्या। नैयायिकाः मीमांसकाश्च अवयवशक्त्यैवार्थबोधं समासेऽङ्गीकुर्वन्ति। अतो नैयायिकाः व्यपेक्षावादिनः सन्ति। अत्र तु सिद्धान्तरत्नाकर-कौमुदीमूलार्थविद्योतिन्योः प्रक्रियात्मकग्रन्थयोः मूलपङ्क्तेः समासशक्तिविषये विविधविचाराः प्रस्तूयन्ते। 'कृत्तद्धितसमासाश्च' इति सूत्रे समासग्रहणस्य नियमार्थता समासे अतिरिक्ता शक्तिस्वीकारे एव सेत्स्यति। 'नित्यं समासेऽनुत्तरपदस्थस्य' इति सूत्रे

नित्यग्रहणं तु स्पष्टार्थं बोध्यम् एवञ्च अव्यपेक्षायाम् अप्राप्तषत्वविधानेन चारिताथ्र्यात्। तथा व्यपेक्षायां कस्कादिसूत्रस्य असिद्धत्वात् विकल्प एवेति। इत्थं भिन्नं भिन्नं मतमत्र समासशक्तेः प्रसङ्गे उभयोः टीकयोः प्रतिपादितम्। अत्र दीनबन्धुझामहोदयस्य तथा नागेशभट्टस्य मतन्तु प्रायः समानमेव दृश्यते।

**कूटशब्दाः - विभाषा, समासः, शक्तिः, यौगिकः, समासवृत्तिः, प्रातिपदिकम्, व्यपेक्षा, वाक्यम्, अवयवशक्तिः, समुदायशक्तिः।**

## पारिभाषिकशब्दाः (Technical Term)

अस्मिन् शोधपत्रे केचन कठिनशब्दाः सन्ति तेषां सरलमर्थविवरणमत्र प्रस्तूयते—

- समासशक्तिः= समुदाये बोधजनकता।
- गतिः= व्याकरणशास्त्रे गतिश्चेत्यादिभिः सूत्रैः कृता सञ्ज्ञा।
- कारकम्= व्याकरणशास्त्रे प्रसिद्धा सञ्ज्ञा।
- अव्याप्तिः= लक्ष्यैकदेशावृतित्वम्।
- विद्योतिनी= पं. दीनबन्धुझाविरचिता सिद्धान्तकौमुद्याः टीका।
- रत्नाकरः= पं. रामकृष्णभट्टविरचिता सिद्धान्तकौमुद्याः टीका।
- पर्यवसन्नम्= स्थितम्।

**नैयायिकमीसांसकवैयाकरणानां मते समासशक्तेः परिचयः**

समासशक्तेः ज्ञानात्पूर्वं शक्तेः स्वरूपम् आदावत्र लिख्यते। ईश्वरेच्छासङ्केतः शक्तिरिति प्राचीननैयायिकाः वदन्ति। इच्छासामान्यमेव शक्तिरिति नव्यनैयायिकानां मतम्। मीमांसकानां मते वाच्यवाचकत्वं सञ्ज्ञासञ्ज्ञिभावो वा शक्तिः। वैयाकरणेषु कौण्डभट्टमते बोधजनकत्वं शक्तिः, परमलघुमञ्जूषाकारमते पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावापरपर्याया। तस्याः ग्राहकः सम्बन्धः तादात्म्यम्। स च सम्बन्धः पदे वाक्ये चेति परमलघुमञ्जूषाकारेण प्रभूतैः प्रमाणैः निरूपितम्।

**नैयायिकमतम्—**

समासः पदयोः पदानां मध्ये वा भवति। अतः पदे शक्तिः स्वीकृता चेत् पुनः समासे शक्तिः न स्वीकर्तव्या इति केचन नैयायिकः वदन्ति। अयं भावः— 'पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्यः' इति समर्थः पदविधिः'[1] सूत्रस्यार्थः। व्यपेक्षारूपम् एकार्थीभावरूपं च सामर्थ्यं द्विविधं भवति । तत्र विशेषेण अपेक्षा (परस्पराकाङ्क्षा) व्यपेक्षा भवति अर्थात् स्वार्थपर्यवसायिनां पदानाम् आकाङ्क्षादिवशाद् यः परस्परं सम्बन्धः, सा व्यपेक्षा कथ्यते । प्रक्रियादशायां प्रत्येकमर्थवत्त्वेन पृथग्गृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादकत्वम् एकार्थीभावस्य लक्षणं भवति । तत्र

---

[1] अष्टाध्यायी-2.1.1

शाब्दिकानां मते वाक्ये व्यपेक्षासामर्थ्यं भवति समासे च एकार्थीभावरूपं सामर्थ्यं भवति । किन्तु नैयायिका वाक्ये समासे वा सर्वत्र व्यपेक्षारूपमेव सामर्थ्यं मन्यन्ते । यथा 'राजपुरुषः' इत्यत्र राजपदं पुरुषम् आकाङ्क्षति, पुरुषपदं च राजानम् आकाङ्क्षति । अतः अनयोः मध्ये परस्पराकाङ्क्षारूपाया व्यपेक्षायाः सत्त्वात् समासो भवति । 'भार्या राज्ञः पुरुषो देवदत्तस्य' इत्यत्र राजपदपुरुषपदयोः समासो न भवति, यतोहि अत्र राजपदं आकाङ्क्षति भार्याम् आकाङ्क्षति, न तु पुरुषम् इति। तथा पुरुषपदस्याप्यन्वयो देवदत्ते अस्ति न तु राजनि। एवञ्च नैयायिकानां मते शक्तं पदं भवति, पदसमुदायश्च वाक्यं भवति। यथा पदसमुदायः वाक्यं भवति तथैव पदार्थसमुदायः वाक्यार्थो भवति । अतः पदसमुदाये समासे वाक्ये वा अवयवशक्तिव्यतिरिक्ता काचित् समुदायशक्तिः न भवति । यतोहि क्लृप्तया अवयवशक्त्या एव समासे यदि अर्थोपपत्तिः भवितुम् अर्हति, तर्हि समुदाये शक्तयन्तरं किमर्थं कल्प्येत? अतः नैयायिकानां मते समासे शक्तिर्नास्ति । आकाङ्क्षादिवशात् अवयवशक्त्या एव विशिष्टार्थबोधो भवति। यत्र च समुदायेन अवयवार्थातिरिक्तः कश्चन अर्थः प्रतीयते, तत्र लक्षणादिना सर्वं व्यवस्थाप्यते । किञ्च 'राजपुरुष' इत्यादौ समासे अवयवार्थत्यागे नूतनसमुदायार्थकल्पने च किमपि प्रमाणम् अपि नास्त्येव। अतः किमर्थं सिद्धाम् अवयवशक्तिं परित्यज्य समुदाये पृथक् शक्तिः कल्पनीया ?

अपि च 'राज्ञः पुरुषः' इति वाक्यस्य योऽर्थः वर्तते, स एव 'राजपुरुष' इति समासस्याप्यस्ति। तदैव समास-विग्रहवाक्ययोः समानार्थकत्वं सिध्यति। अन्यथा वाक्यार्थः भिन्नः समासार्थश्च भिन्नः स्वीक्रियेत, तदा समास-विग्रहवाक्ययोः समानार्थकत्वमेव न स्यात् । तथा सति 'राज्ञः पुरुषः' इति वाक्येन भिन्नार्थकत्वात् 'राजपुरुष' इत्यस्य अर्थनिर्णयोऽपि न स्यात् । अतः समासे पृथक् शक्तिकल्पनाया आवश्यकता नास्ति। इत्थं नैयायिकाः समासे शक्तिं न स्वीकुर्वन्ति। समासे शक्त्यस्वीकारे येऽपि दोषाः समापतन्ति तेषां समुचितं समाधानमपि ते कुर्वन्तीति।

**मीमांसकमतम्—**

समासशक्तिविषये यद्यपि मीमांसाकेष्वपि मतभेदो दृश्यते, तथापि प्रायः मीमांसका व्यपेक्षावादिन एव सन्ति। एतेऽपि समासे शक्तिं न स्वीकुर्वन्ति । केचन मीमांसकाः मन्यन्ते यत् **"सर्वत्र यौगिकैः शब्दैः द्रव्यमेवाभिधीयते"** इति वाक्यानुरोधात् अरुणाधिकरणाद्यनुरोधात् च सर्वेषां कृदन्त-तद्धितान्त-समासरूपाणां यौगिकशब्दानां द्रव्ये शक्तिः एव स्वीकरणीया, न तु अवयवशक्त्या निर्वाहः सम्भवतीति । अरुणाधिकरणन्यायस्य तु अयं भावः— **"अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति"** इत्यत्र पिङ्गाक्षीशब्दस्य एकहायनीशब्दस्य च द्रव्यवाचकत्वं स्वीकृतं वर्तते । पिङ्गाक्ष्यादिशब्दे बहुव्रीहिः समासो वर्तते यस्य विग्रहो भवति- **'पिङ्गे अक्षिणी यस्याः सा पिङ्गाक्षी गौः'** इति। अत्र अवयवशक्त्या द्रव्यवाचकत्वं न सम्भवति, अपितु समुदायशक्त्या एव द्रव्यवाचकत्वं सम्भवति। । अतः एतेषां मते समासस्य विशिष्टार्थवाचकत्वं वर्तते।

अन्ये मीमांसकास्तु **"सर्वत्र यौगिकैः शब्दैः द्रव्यमेवाभिधीयते"** इति वचनम् अनिर्ज्ञातशक्तियौगिकपरम् इति स्वीकुर्वन्ति तथा च यौगिकशब्देषु केषाञ्चित् शब्दानां

द्रव्यवाचकत्वेऽपि समासे सर्वत्र शक्तिं न स्वीकुर्वन्ति। पिङ्गाक्ष्यादौ गुणवाचकपदस्य बहुव्रीहिः वर्तते, गुणश्च द्रव्यं विना स्थातुं न शक्नोति, अतः द्रव्याविनाभूतगुणवाचकपदबहुव्रीहेः द्रव्यवाचकत्वेऽपि सर्वत्र बहुव्रीहौ अन्यसमासेषु वा शक्तिर्नास्त्येव इति प्रतिपादयन्ति।

इत्थं मीमांसकानां यद्यपि परस्परं स्वल्पमतभेदोऽस्ति तथापि काँश्चन मीमांसकान् विहाय समासे (विशिष्टे) शक्तिं न स्वीकुर्वन्ति। अतः एतेषां मतेऽपि नैयायिकवद् अवयवशक्त्या एव निर्वाहः कर्तव्यः, समासे शक्तिस्वीकारस्य आवश्यकता नास्तीति निष्कर्षः।

**वैयाकरणमतम्—**

वैयाकरणाः समासे अवयवशक्त्यतिरिक्तां समुदायशक्तिं स्वीकुर्वन्ति। एतेषां मतानुसारं यथा 'घटः, पटः' इत्यादौ घकारादिवर्णसमुदायरूपः एव घटादिशब्दः अर्थवान् अस्ति, घटादिशब्दघटक: एकैकवर्णः अनर्थको वर्तते, अर्थात् पदे पदस्य एव अर्थवत्त्वं स्वीक्रियते, पदघटकानां वर्णानां च अनर्थकत्वमेव, तथैव समासवृत्तावपि समुदायस्यैव अर्थवत्त्वं स्वीकार्यं वृत्तिघटकानि पदानि अनर्थकानि एव । इत्थं 'राजपुरुष' इत्यादौ समासशक्त्या एव राजविशिष्टपुरुषस्य भानसम्भवे राजपुरुषपदयोः अपि पुनः तद्बोधकत्वकल्पना व्यर्थैव। यथा 'वृषः, यावः' इत्यादेः योऽर्थः वर्तते, स एव 'वृषभः, यावकः' इत्यादेः अर्थो वर्तते, किन्तु वृषभशब्दघटकस्य 'वृष' इत्यस्य यावकशब्दघटकस्य 'याव' इत्यस्य च कश्चन अर्थो न वर्तते। अर्थात् स्वतन्त्रः वृषादिशब्दः अर्थवान् अस्ति, वृषभशब्दोऽपि अर्थवान् अस्ति, किन्तु वृषभादिशब्दे विद्यमानः वृषादिशब्दोऽर्थवान् नास्ति। उक्तञ्च— **"यत्र समुदायो हि अर्थवान्, तस्यैकदेशोऽनर्थकः"** इति । तथैव वाक्ये 'राज्ञः' इत्यपि अर्थवान् वर्तते, पुरुषशब्दोऽपि अर्थवान् वर्तते, किन्तु 'राजपुरुषः इत्यादिवृत्तौ विद्यमानः राजशब्दः पुरुषशब्दो वा पुनः पृथक् पृथक् अर्थवान् नास्ति । अपितु 'राजपुरुष' इति समुदाय एव अर्थवान् वर्तते। अतः समुदाये शक्तिः आवश्यकी । अन्यथा यथा ऋद्धस्य राज्ञः पुरुषः' इत्यादौ वाक्ये राजाद्यर्थस्य स्वतन्त्रोपस्थितिसत्त्वात् तत्र विशेषणलिङ्गसंख्यादीनाम् अन्वयो भवति, तथैव 'राजपुरुष' इत्यादौ अपि घटकेन राजादिपदेन स्वातत्र्येण अर्थोपस्थितिसत्त्वात् तत्र विशेषणाद्यन्वयः स्यात् अपि च यदा वाक्ये समासे वा सर्वत्र व्यपेक्षारूपमेव सामर्थ्यं स्वीकरिष्यते, तथा च तादृशसामर्थ्यं समासविधानं स्वीकरिष्यते, तदा सर्वत्र समास एव स्यात, वाक्यं कुत्रापि न स्यात् अर्थात् समासो वाक्यस्य नित्यं निवर्तको भवेत्। किन्तु विकल्पेन वाक्यमपि इष्यते समासोऽपि । अतः एतदर्थं व्यपेक्षापक्षे **'विभाषा'**[2] इत्यधिकारसूत्रम् आवश्यकम्।

वैयाकरणानां मते तु व्यपेक्षारूपं सामर्थ्यं यदा विवक्षितं भवति तदा 'राज्ञः पुरुष' इत्यादि वाक्यं भवति, यदा च एकार्थीभावरूपसामर्थ्यस्य विवक्षा भवति तदा 'राजपुरुष' इति समासो भवति । अतः अस्मिन् पक्षे **"विभाषा"** इति सूत्रस्य आवश्यकता न भवतीति लाघवमस्ति । अत एवोक्तं भट्टोजिदीक्षितेनापि—

**समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्।**

---

[2] अष्टाध्यायी- 2.1.11

**बहूनां वृत्तिधर्माणां वचनैरेव साधने।**
**स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः॥**[3]

अयमाशयः— येन प्रकारेण पङ्कजशब्दे कमलस्य बोधिकाशक्तिः अवयवार्थात् (पङ्कजनिकर्तृत्वात्) पृथग् (स्वतन्त्रा) एव शक्तिः वर्तते। तेनैव प्रकारेण समासेऽपि अवयवार्थात् (पदार्थात्) पृथगेव समुदायरूपा स्वतन्त्रा शक्तिः वर्तते।

वैयाकरणानाम् इदमेव मतम् आधारीकृत्य सिद्धान्तरत्नाकरकारेण कौमुदीमूलार्थविद्यातिनीकृता च वैयाकरणसिद्धान्तकौमुदीस्थानां पङ्क्तीनां समन्वयः कृतो दृश्यते।

**'कृत्तद्धितसमासाश्च' इति सूत्रे समासग्रहणनियमार्थपक्षे समासशक्तिविचारः—**

वैयाकरणाः समासेऽपि (समुदायेऽपि) शक्तिं स्वीकुर्वन्ति,नैयायिकाः इदं मतं नाङ्गीकुर्वन्ति,ते वदन्ति यत् यदि अवयवशक्त्यैवार्थबोधः स्यात् तर्हि समुदाये शक्तिः किमर्थं स्वीकर्तव्या। नैयायिका अवयवशक्त्यैवार्थबोधं समासेऽङ्गीकुर्वन्ति। अतो नैयायिकाः व्यपेक्षावादिनः सन्ति। अतस्तेषां मते समासस्य अर्थवत्त्वाभावात् **'अर्थवदधातुरप्रत्ययःप्रातिपदिकम्'**[4] इति सूत्रेण प्रातिपदिकसञ्ज्ञा नैव प्राप्ता, अतः समासे सञ्ज्ञाकरणार्थं **'कृत्तद्धितसमासाश्च'**[5] इति सूत्रे समासग्रहणं विध्यर्थमेवास्ति,तर्हि कथं वैयाकरणानां नियमार्थपक्षः सङ्गतो भवति इति प्रश्नः। यदि विशिष्टे शक्तिः स्वीक्रियते चेत् गौरवं भवति। इत्थं नैयायिकानां मतस्वीकारे 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इति परिभाषया कृदन्तत्वात् **'मूलकेन उपदंशम्'** इति वाक्ये प्रातिपदिकसञ्ज्ञा दुर्निवारा। न च 'अर्थवत्' इत्यानुवृत्त्या अर्थवत् एव कृदन्तस्य ग्रहणमिति वाच्यम्, यतोहि 'कर्त्ता कारकः' इत्यादावप्यानर्थक्यस्य तुल्यत्वेन अव्याप्तेः अपरिहार्यत्वात्। इत्थं नैयायिकानां मते दोषदर्शनं कारयित्वा जैमिनिरीत्यापि समासग्रहणं नियमार्थमुक्तम्।

यद्यपि वैयाकरणभूषणसाररीत्या मीमांसका अपि व्यपेक्षावादिनः सन्ति, अतः नैयायिकमीमांसकयोः मतं समानं स्यात्, किन्तु मीमांसकेष्वपि समासशक्तिविषये नैकानि मतानि सन्तीति मया पूर्वमपि प्रतिपादितम्। तेष्वेकं मतं रत्नाकरकृता प्रदर्शितमिति प्रतिभाति यतोहि **"सर्वत्र यौगिकैः शब्दैः द्रव्यमेवाभिधीयते"** इति वचनादन्यं रत्नाकरे **"सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति च स्थितम्"** इति वचनं लभ्यते। अयं विषयः विद्योतिन्यां नास्ति।

**"अर्थग्रहणं किम्? वृत्तावर्थान्तरोपसंक्रान्ते मा भूत्,वाप्यामश्वो वाप्यश्वः" इति सन्दर्भे रत्नाकरकारस्य समासशक्तिविचारः—**

रत्नाकरकारोऽत्र 'अर्थान्तर' इति प्रतीकमादाय व्याख्याने प्रवृत्तो भवति— सप्तम्यां श्रूयमाणायां यावानर्थो 'वाप्यामश्वः' इत्यत्र वापीप्रकारकसप्तम्यर्थमात्रविशेष्यकः सप्तम्यन्तपदेऽवगम्यते तावानेव तस्यां लुप्तायामपि (सप्तमीलुप्तायामपि) यदाऽवगम्यते तदा

---

[3] वैयाकरणभूषणसारः,समासशक्तिप्रकरणम्-01

[4] अष्टाध्यायी-1.2.45

[5] अष्टाध्यायी-1.2.46

प्रगृह्यसञ्ज्ञा भवति, न तु प्रकृतिप्रत्ययार्थोभयप्रकारकोत्तरपदार्थवृत्तित्वे सतीत्यर्थः। (भट्टोजिदीक्षितेन) एतत् = उपर्युक्तवाक्यं जहत्स्वार्थावृत्तिं (जहति पदानि यस्यां वृत्तौ सा) अभिप्रेत्य उक्तम्। जहत्स्वार्थवृत्तिपक्षे पूर्वोत्तरपदयोर्वर्णवद् आनर्थक्यान्न कश्चिद्दोषः। अर्थात् जहत्स्वार्थावृत्तिपक्षे 'ईदूतौ च' इति सूत्रे अर्थग्रहणं नावश्यकम्।

"**अर्थग्रहणं किम्? वृत्तावर्थान्तरोपसंक्रान्ते मा भूत्, वाप्यामश्वो वाप्यश्वः" इति सन्दर्भे विद्योतिनीकारस्य समासशक्तिविचारः** —

**'ईदूतौ च सप्तम्यर्थे'**[6] इति सूत्रे 'अर्थग्रहणं किमर्थम्' इति प्रश्नविषये विद्योतिनीकारोऽतिगभीरतया विचारयति। एतत्सर्वमत्र प्रस्तूयते– उक्तसूत्रे अर्थग्रहणाभावेऽपि सूत्रस्य एवमर्थो भविष्यति यद् –ईदन्तमूदन्तञ्च सप्तम्यन्तं प्रगृह्यसञ्ज्ञकं भवति इत्यर्थकरणेऽपि **'गौरी + अधिश्रितः'** इत्यादौ **'प्रत्ययलोपे प्रत्ययलक्षणम्'**[7] इति सूत्रेण प्रत्ययलक्षणत्वात् प्रगृह्यसञ्ज्ञा निराबाधा। न च 'सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ती'ति परिभाषया तदादिविशेष्यकप्रत्ययविशेषणकतदन्तविधिनिषेधात्,तर्हि अत्र सप्तमीविशेषणतदन्तविध्यभावात् ईदूदन्ताः सप्तमीप्रगृह्यमित्येवार्थः स्यात्। तथा च **'सोमो गौरी+अधिश्रितः'** इत्यत्र प्रगृह्यसञ्ज्ञा न भविष्यति,अतः अर्थग्रहणमावश्यकमिति वाच्यम्। न वाच्यमिति भावः। यतो हि ईदूदन्तायाः सप्तम्या अभावात् सूत्रारम्भसामर्थ्यादेव 'सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति' इति परिभाषा इह = सूत्रे न प्रवर्तते। यद्यपि **'ययी पपी'** शब्दाभ्यां सप्तम्येकवचने तदेव रूपाणि भवन्ति तथापि सूत्रस्य चरितार्थताऽत्र न शङ्कनीया। यतो हि अर्थग्रहणाभावे सूत्रारम्भसामर्थ्यात् तदन्तविधिर्भविष्यति 'ईदूतौ च सप्तम्यर्थे' इति सूत्रस्य भाष्यप्रामाण्येन सप्तम्येकवचनान्त 'ययी पपी' शब्दयोरनभिधानात् इत्युक्त्वा टीकाकारःपुनरपि अर्थग्रहणं सूत्रे आवश्यकम् इति द्रढयन् लिखति– समासेऽर्थान्तरेण उपसङ्क्रान्ते सप्तम्यर्थे वर्तमानस्य पूर्वपदस्य प्रगृह्यसञ्ज्ञा मा भूद् इत्येतदर्थमर्थग्रहणं सूत्रे आवश्यकमत एव सिद्धान्तकौमुद्यामत्र मूले यदुक्तं तत् सङ्गतं भवति। तथा च मूलोक्तवृत्तिपदेन समासवृत्तिरेव गृह्यते। यतो हि वृत्त्यन्तरे फलाभावात्। तथा च प्रकृतपङ्क्तेरर्थ इत्थं परिष्करणीयः— समासे अर्थान्तरेण उत्तरपदार्थेन सङ्क्रान्ते = संबद्धे अश्वादिरूपोत्तरपदार्थं प्रति विशेषणीभूयोपस्थिते सप्तम्यर्थे विद्यमानस्य 'वापी' इत्यादेः प्रगृह्यसञ्ज्ञा मा भूत्,अतः अर्थग्रहणमावश्यकम्।

द्वितीयानुच्छेदे दीनबन्धुझाः 'सप्तम्यर्थे' इति पदं गभीरतया विचारयति तद्यथा — भट्टोजिदीक्षितेन प्रकृतसूत्रे 'सप्तम्यर्थे पर्यवसन्नमीदूदन्तमिति वृत्तिः कृता = लिखिता। न तु 'सप्तम्यर्थे वर्तमानम्' इति वृत्तिर्लिखिता। एतेन 'वाप्यश्वः' इत्यादौ हि वाप्यादेः सप्तम्यर्थे विद्यमानत्वेऽपि,तत्र सप्तम्यर्थःपर्यवसन्नत्वाभावात् न प्रगृह्यसञ्ज्ञा प्रवर्तते। सप्तम्यर्थपर्यवसन्नत्वस्य त्वयमाशयः—सप्तम्यर्थनिष्ठमुख्यविशेष्यताकोपस्थितिजनकत्वम्,तर्हि अस्य समन्वयः क्रियते 'वाप्यश्वः' इत्यादि समस्तपदात् वापीनिष्ठाधिकरणतानिरूपक-

---

[6] अष्टाध्यायी-1.1.19

[7] अष्टाध्यायी-1.1.62

अश्वोपस्थित्या उपस्थितीया मुख्यविशेष्यता अश्वे एव,न तु सप्तम्यर्थाधिकरणत्वे,विशेष्यतायां मुख्यत्वं हि– स्वनिरूपकज्ञानीयं प्रकारत्वासामानाधिकरण्यम् इति,वापीनिष्ठविशेष्यताया अश्वनिष्ठविशेष्यतानिरूपितनिरूपकत्वसम्बन्धावच्छिन्नप्रकारत्व-सामानाधिकरण्येन मुख्यत्वाभावात्। एवं रूपेण परिष्कारशैल्यां प्रकृतविषयः सुस्पष्टतया निगदितः।

टीकाकारस्तृतीयानुच्छेदे प्रकृतसूत्रस्य 'सप्तम्यर्थे' इति पदस्य सप्तम्यर्थपर्यवसन्नमित्यर्थः कथं लभ्यते ? इति उत्तरयति। यत्– अर्थग्रहणे नैव इति अवेहि = जानीहि,अर्थात् अर्थग्रहणे सति हि तत्सामर्थ्यात् 'प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः' इति न्यायाद्वा प्रधाने सप्तम्यर्थे विद्यमानमित्यर्थो लभ्यते। अत्र सप्तम्यर्थस्य प्राधान्यञ्चोपस्थितीयमुख्यविशेष्यत्वमिति तेनोक्तस्यार्थस्य सिद्धिर्भवति। इतः आरभ्य टीकाकारः पूर्वप्रतिपादितस्य विषयस्य भाष्यप्रामाण्यरीत्या उपसंहारं करोति-'ईदूतौ च सप्तम्यर्थे' इति सूत्रस्य भाष्यप्रामाण्येन च ययी-पपीशब्दयोः सप्तम्येकवचनेऽनभिधानमित्थं कल्पते –ईदूतौ च सप्तम्यर्थे' इति सूत्रभाष्ये अर्थग्रहणाभावे सूत्रारम्भसामर्थ्यात्तदन्तविधिरिति किमर्थमर्थग्रहणमिति शङ्कायाः सरः शब्दस्य सप्तम्येकवचने तस्य 'सुपां सुलुक्....' इति सूत्रेण दीर्घादेशे इति न शुष्कं सरसीशयनमित्यत्र सूत्रसार्थक्ये प्रदर्शिते तत्रापि सरसी यदीति तत्सार्थक्यं खण्डितम्। यदि तत्रापि इति न शुष्कं सरसीत्यत्रापि सरसीशब्दो ङीप्प्रत्ययान्तः स्यात्,ततो ङेर्लुकि सरसीशब्दः न तु 'सरस्'-शब्दस्य सप्तम्येकवचने सरसीति,तदा तत्रापि चारितार्थ्याभाव इत्याशयः। तत्र = भाष्ये सरसीशब्दे एव सार्थक्यमुद्भावितं न तु 'ययी-पपी' इत्यनयोः (शब्दयोः)। किञ्च (सूत्रे) अर्थग्रहणसामर्थ्यात् तदन्तविधिना सिद्धेऽर्थग्रहणं पूर्वपदस्य मा भूत् इत्यर्थमित्युक्तम्। तेन ययीपपीशब्दयोः सप्तम्येकवचनेऽनभिधानं कल्पनीयम्। अन्यथा उक्तभाष्यस्य असङ्गत्यापत्तिः स्याद् इति भाष्यं तद्भावं च प्रदर्श्य दीनबन्धुना पूर्वोक्तं सिद्धान्तं स्थापितम्।

**"अर्थग्रहणं किम्? वृत्तावर्थान्तरोपसंक्रान्ते मा भूत्,वाप्यामश्वो वाप्यश्वः" इति सन्दर्भे उभयोष्टीकयोः साम्यवैषम्यप्रदर्शनपूर्वकं युक्तायुक्तत्वसमीक्षणम्—**

इयं फक्किका 'ईदूतौ च सप्तम्यर्थे' इति सूत्रे सिद्धान्तकौमुद्यां वर्त्तते। शोधकर्त्ता प्रकृतपङ्क्तेः साधारणं स्पष्टीकरणमवतरणपुरस्सरं करोति। प्रकृतसूत्रे 'सप्तम्यर्थे' इति पदम् अधिकरणकारकस्य वाचकम्,कारकाणां क्रियान्वयत्वात्,विद्यमानार्थकस्य पर्यवसन्नार्थस्यात्राध्याहारो भवति। तत्र 'पर्यवसन्नम्' इति शब्दस्य विशेष्यत्वात् 'ईदूतौ' इत्यस्य तस्य विशेषणत्वात् **'येन विधिस्तदन्तस्य'**[8] इति सूत्रेण तदन्तविधिर्भवति तदाऽयमर्थो निष्पद्यते— सप्तम्यर्थे पर्यवसन्नम् ईदूदन्तं प्रगृह्यं स्यात्। अथ ईदन्तस्योदाहरणम् –'सोमो गौरी अधिश्रितः' इत्यत्र गौरीशब्दोत्तरस्य ङिविभक्तेर्लुक् 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः' इति सूत्रेण भवति। **सूत्रार्थः— छन्दसि विषये सुपां स्थाने सु,लुक्,आ,आत्,शे,या,डा,ड्या,याचालित्येते आदेशा भवन्ति।** लुगुत्तरं 'यः शिष्यते स लुप्यमानार्थाभिधायी' इति न्यायेन 'गौरी'पदं गौर्यधिकरण इति सप्तम्यर्थे पर्यवसन्नं वर्त्तते । तेन तस्य

---

[8] अष्टाध्यायी-1.1.72

प्रगृह्यसञ्ज्ञा भवति। प्रगृह्यत्वात् गौरी+अधिश्रित इत्यत्र  यणादेशो न भवति। ऊदन्तस्योदाहरणं 'मामकी तनू' इति वर्तते।

सूत्रे अर्थग्रहणाभावे हि 'ईदूतौ च सप्तमी' इति सूत्रस्य स्वरूपं स्यात्। तथाहि 'ईदूतौ' इति पदं 'सप्तमी' इति पदस्य विशेषणत्वे तदादिविशेष्यकसप्तमीविशेषणकतदन्तविधिना ईदन्तमूदन्तञ्च (यत्) सप्तम्यन्तं तस्य प्रगृह्यसञ्ज्ञा स्यात् इति विद्योतिनीकारस्याशयः। एतादृशार्थकरणेनापि 'गौरी+अधिश्रितः' इत्यत्र ईदन्तं तु स्वतः वर्त्तत एव । तथा च प्रत्ययलक्षणेन सप्तम्यन्तमपि सुलभं तेन प्रगृह्यसञ्ज्ञा निराबाधा। 'सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति' इति परिभाषा तु नेह प्रवर्त्तते। यतो हि परिभाषाप्रवृत्तौ तदन्तग्रहणाभावात् प्रकृतसूत्रार्थ एवं भवेत् – ईदूदन्तरूपा या सप्तमी तस्याःप्रगृह्यसञ्ज्ञा स्यात्,तेन 'गौरी+अधिश्रितः' इत्यत्र तु सप्तम्याः लुप्तत्वात् प्रगृह्यसञ्ज्ञा  न भविष्यति,तर्हि 'ययी+आसक्तः' इत्येव सूत्रस्योदाहरणं स्यात्। किन्तु एतादृशस्योदाहरणस्य भाष्येऽनभिधानात् तथा ऊत्-अंशे सप्तम्या उदाहरणानामसंभवात् एतादृशमर्थकरणं न सङ्गतम्। तेन प्रतीयते यत् 'सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणम्' इति परिभाषा इह फलाभावात् न प्रवर्त्तते। अस्य तदन्तविध्यंशपक्षस्य निरूपणं विद्योतिन्यां वर्त्तते,मूलरत्नाकरग्रन्थे नास्ति। किन्तु छात्रेभ्यः हिताय सम्पादकमहोदयेन टिप्पण्यां दिङ्मात्रेण प्रदर्शितम्। इदानीं प्रकृतमनुसरामः— सूत्रे अर्थग्रहणाभावेऽपि "ईदन्तमूदन्तं यत्सप्तम्यन्तं पदं तस्य प्रगृह्यसञ्ज्ञा भवति" इत्यर्थकरणेन गौरी+अधिश्रितः,मामकी तनू+(इति) इत्यादिप्रयोगेषु तु न कश्चिद्दोषः,किन्तु वृत्तौ = समासवृत्तौ अर्थान्तरेणोपसङ्क्रान्ते सप्तम्यर्थे वर्त्तमानस्य पूर्वपदस्य प्रगृह्यसञ्ज्ञा मा भूत्  इत्येतदर्थमर्थग्रहणं क्रियते। तेन 'वाप्यश्वः' इत्यादौ न दोषः। 'वाप्यश्व' इत्यस्यार्थोऽनेन प्रकारेणास्ति— वापीनिष्ठ-अधिकरणता-निरूपित-आधेयतावान् अश्वः। अत्र समासे समुदायनिष्ठशक्तेः एकत्वात् वापी–अश्वपदयोः संश्लिष्टार्थो (सम्मिलितार्थो) भवति। अतः स्पष्टमस्ति यद् ईदन्तः 'वापी'शब्दः प्रत्ययलक्षणेन सप्तम्यन्तं तु वर्त्तते किन्तु समासवृत्तौ तत् अधिकरणार्थे न संसृष्टः सन् आधेये (अश्वे) इत्यर्थपर्यन्तं तस्य वृत्तिः वर्त्तते। अतः अर्थग्रहणात् 'वापी'शब्दस्य प्रगृह्यसञ्ज्ञा न भवति।  तदेव विद्योतिनीकारोऽपि स्पष्टतया प्रतिपादयति यत्— "सप्तम्यर्थपर्यवसन्नत्वे हि सप्तम्यर्थनिष्ठमुख्य-विशेष्यताकोपस्थितिजनकत्व-वाप्यश्व इत्यादेः समस्तपदात् वापीनिष्ठाधिकरणतानिरूपकाश्वोपस्थित्या उपस्थितीया मुख्यविशेष्यता अश्वे एव न तु सप्तम्यर्थाधिकरणत्वे।" किन्तु इदं सर्वम् अजहत्स्वार्थावृत्तिपक्षे इति रत्नाकरकर्त्तुः मतम्। जहत्स्वार्थवृत्तिपक्षे पूर्वोत्तरपदयोः आनर्थक्यान्न कश्चिद्दोषः। अर्थात् प्रगृह्यसञ्ज्ञा न भवतीति यावत्। इदं शेखरेऽप्युक्तं किन्तु विद्योतिन्यां जहदजहद्विषये किमपि न विचारितम्।

अत्र अर्थग्रहणसामर्थ्याद् इदं सर्वदा अवधेयं यत्— यत्र सप्तम्याः सत्त्वे आधेयात् असंसृष्टाधिकरणस्य  प्रतीतिर्भवति। सा प्रतीतिर्यदि सप्तम्या लुप्तेऽपि यत्र आधेयासंसृष्टाधिकस्य भवति तत्रैव प्रगृह्यसञ्ज्ञा भवति। विद्योतिनीकृता एको महत्त्वपूर्णो विषयो विचारितः। तादृशो विषयःप्रायोऽन्यत्र टीकासु न परिलक्ष्यते। स चेत्थम्— सूत्रे 'सप्तम्यर्थे  पर्यवसन्नमि'ति वृत्तिः

कृताः,किन्तु तस्य स्थाने 'सप्तम्यर्थे वर्त्तमानम्'इति वृत्तिः कथं न विहिता ? तत्रोच्यते –'वाप्यश्व' इत्यादौ हि वाप्यादेः सप्तम्यर्थे वर्त्तमानत्वेऽपि (प्रत्ययलोपे प्रत्ययलक्षणम् इति सूत्रेणेति भावः) विद्यमानत्वेऽपि तत्र पर्यवसन्नत्वाभावात् = अवधारितत्वाभावात् न प्रगृह्यसञ्ज्ञा भविष्यति इति कश्चन भेदः विद्योतिनीकृता प्रदर्शितः।

**"सामर्थ्यमिह व्यपेक्षा" इति सन्दर्भे विद्योतिनीटीकायाः समासशक्तिविचारः** —

इयं पङ्क्तिः **'इसुसोः सामर्थ्ये'**[9] इति सूत्रे कौमुद्यां दीक्षितेन 'सामर्थ्य' इति पदस्यार्थबोधनाय विसर्गसन्धौ उल्लिखितम्। दीनबन्धुझामहोदयेन तस्यावतरणं प्रदर्श्य एकार्थीभावस्य व्यपेक्षायाश्च लक्षणोदाहरणं प्रस्तुतम्। तद्यथा— ननु 'इसुसोः सामर्थ्ये' इति सूत्रस्य 'सर्पिष्करोति' इति उदाहरणं न भवितुमर्हति, यतो हि अत्र एकार्थीभावरूपसामर्थ्यात् । **एकार्थीभावसामर्थ्यन्तु निरूप्यनिरूपकभावापन्न-विषयताकोपस्थिति-जनकत्वरूपः।** समन्वयो यथा– राजपुरुषः इत्यतः स्वत्वसम्बन्धेन राजविशिष्ट-पुरुषस्योपस्थित्या तादृशोपस्थितीय-राजनिष्ठविषयतापुरुषनिष्ठ-विषयतयोर्निरूप्य-निरूपकभावापन्नतया तादृशोपस्थितिजनकत्वरूपं सामर्थ्यं 'राजपुरुष' इत्यस्य। 'सर्पिः करोति' इत्यत्र तु सर्पिः शब्दात् सर्पिषःपृथगेवोपस्थितिर्जायते, तथा 'करोति' इत्यनेन क्रियायाः पृथगुपस्थितिर्भवति, न तु सर्पिर्विशिष्टक्रियायाः उपस्थितिर्भवति। अत एव नास्ति सामर्थ्यम् (एकार्थीभावः)। तस्मात् 'परमसर्पिष्पानम्' इत्यादय एवोदाहरणानि स्युः। एतन्निराकरोति ग्रन्थकारः– इह हि सामर्थ्यपदेन व्याख्यानात् व्यपेक्षारूपं सामर्थ्यं गृह्यते, न तु एकार्थीभावात्मकम्। व्यपेक्षा च निरूप्यनिरूपकभावापन्न- विषयताकशाब्दबोधजनकत्वे सति निरूप्यनिरूपकभावानापन्नविषयताकोपस्थितिजनकत्वम्। इत्थं पं० दीनबन्धुना अतिसारल्येन विषयः उपवर्णितः। नागेशस्यापि तत्तुल्यं मतमस्ति। अतः उक्तविषयप्रतिपादनं युक्तमेवास्ति।

**"कस्कादिषु सर्पिष्पकुण्डिकाशब्दोऽसमासे व्यपेक्षाविरहेऽपि षत्वार्थः व्यपेक्षायां नित्यार्थश्च" इति सन्दर्भे सिद्धान्तरत्नाकरकौमुदीमूलार्थविद्योतिन्योः समासशक्तिविचारः**——

इयं पङ्क्तिः **'नित्यं समासेऽनुत्तरपदस्थस्य'**[10] इति सूत्रे विसर्गसन्धिप्रकरणे श्रीमद्भट्टोजिदीक्षितेन लिखिता। तत्र हि – श्रीमता दीक्षितेन 'नित्यं समासेऽनुत्तरपदस्थस्य' इति सूत्रस्योदाहरणद्वयं प्रदर्शितम्। प्रथमोदाहरणं 'सर्पिष्कुण्डिका' इति, द्वितीयोदाहरणं 'धनुष्कपालम्' इति वर्त्तते। किन्तु 'सर्पिष्कुण्डिका' इति शब्दस्य पाठः कस्कादिगणे वर्त्तते, तर्हि तत्र पाठेनैवेष्टसिद्धेः (षत्वसिद्धेः) तदा नित्यं समासे ...' इति सूत्रे दीक्षितस्य 'सर्पिष्कुण्डिका' इत्युदाहरणमयुक्तं प्रतिभाति इति प्रश्नः। तदुत्तरयति मूलकारः –"कस्कादिषु सर्पिष्कुण्डिकाशब्दोऽसमासे व्यपेक्षाविरहेऽपि षत्वार्थः। व्यपेक्षायां नित्यार्थश्च" अर्थात् कस्कादिगणे सर्पिष्कुण्डिका इति शब्दस्य पाठः यत्र व्यपेक्षासामर्थ्यस्य विरहे = अभावे समासो नास्ति, तत्र षत्वकरणार्थ आवश्यकः। यथा –**'तिष्ठतु सर्पिः,**

[9] अष्टाध्यायी-8.3.44

[10] अष्टाध्यायी-8.3.45

**कुण्डिकां पश्य'** इत्यत्र षत्वार्थःकस्कादिगणेऽपि पाठ आवश्यकः। तथा यत्र व्यपेक्षासामर्थ्यं वर्त्तते तत्र समासत्वात्  'इसुसोः सामर्थ्ये' इति सूत्रेण नित्यषत्वकरणाय कस्कादिगणे पाठः आवश्यकः। एतादृश्यामवस्थायां प्रकृतसूत्रं नियमरूपे स्थितमिति भावः। उभयोरपि टीकयोः प्रकृतविषयःकुत्रचित् स्थलेषु समानरूपेण क्वचिच्च भिन्नरूपेण वर्णितः। प्रकृतपङ्क्तेरवतरणिका तु प्रायः उभयत्रापि समानमेव वर्त्तते किन्तु कौमुदीमूलार्थविद्योतिन्यां नातिविस्तरेण नातिसङ्क्षेपेण विषयः निरूपितः। 'परमसर्पिष्कुण्डिका'इति विषये उभयोष्टीकयोः यल्लिखितं तदत्र लिख्यते— सिद्धान्तरत्नाकरेऽयं विषय इत्थमस्ति -अत्रेदमवधेयम् -'परमसर्पिष्कुण्डिका' इत्यत्र 'कस्कादिषु च' इति सूत्रेणापि कस्कादिगणे पाठाभावात् षत्वं न भविष्यति। भाष्यकारेण तथैव प्रत्युदाहृतत्वात्। किन्तर्हि 'अनुत्तरपदस्थस्य' इति ग्रहणं व्यर्थम् ? 'परमहविष्कुण्डिका' इत्याद्यर्थं तदावश्यकत्वात्।

## निष्कर्षः (Conclusion)

- समासे अवश्यमेव पृथक् शक्तिः स्वीकरणीया। अवयवशक्त्या निर्वाहः असम्भवः।
- समासे अतिरिक्तशक्तेः स्वीकारादेव 'कृत्तद्धितसमासाश्च' इति सूत्रस्थं समासग्रहणं नियमार्थं भवति।
- "वृत्तावर्थान्तरोपसंक्रान्ते मा भूत्,वाप्यामश्वो वाप्यश्वः" इत्यादीनां कौमुदीस्थानां पङ्क्तीनामपि दर्शनेन ज्ञायते यद् वैयाकरणाः समासेऽतिरिक्तशक्तिवादिनः सन्ति।
- समासशक्तिदीपिकायां पं. दीनबन्धुझा अपि समासे अतिरिक्तशक्तेः उद्घोषं करोति—

  **निखिलेषु समासेषु विशिष्टार्थनिरूपिता।**
  **आस्थीयते शाब्दबुद्ध्यै शक्तिर्योगविलक्षणा॥**[11]
- रत्नाकरे यद्यपि 'परमसर्पिष्कुण्डिका' इति शब्दः सम्पादकमहोदयेन निवेदितं किन्तु अस्य स्थाने 'ज' 'त'  पाण्डुलिप्योः 'परमहविष्कुण्डिका' इति पाठः शोधकर्त्तुः मते युक्तः। दीनबन्धुझाः प्रकृतविषयसन्दर्भे कथयति कस्कादिगणे 'सर्पिष्कुण्डिकाशब्दःपठ्यते स च समस्तोऽसमस्तो वा इति दृढतरप्रमाणाभावाज्ज्ञातुं शक्यते। तत्र समासे 'नित्यं समासे ....' इति सूत्रेण षत्वे सिद्धे अनुत्तरपदस्थस्येति बाधकबाधनाय पाठः। तेन 'परमसर्पिष्कुण्डिका' इत्यत्र उत्तरपदस्थत्वेऽपि षत्वं भवति। सिद्धान्तरत्नाकरकारमते तु दीक्षितोक्तमुदाहरणमयुक्तम्। अतः 'सर्पिष्कुण्डिका' इत्यस्य स्थाने 'हविष्कुण्डिका' इति उदाहार्यम्।
- किन्तु विद्योतिनीकारस्तु दीक्षितोक्तमेवोदाहरणं परिष्करोति, तद्यथा-'अप्रत्ययस्य' इत्यस्य प्रत्ययभिन्नस्य इत्यर्थाभ्युपगमे इसुसोरिति सूत्रं त्रिविभाषासु प्राप्तविभाषा वर्त्तते। तदा 'अनुत्तरपदस्थस्येति...' नियमार्थं भविष्यति, तर्हि अयमर्थो भविष्यति यत्- समासे इसुसोर्विसर्गस्य षत्वं चेत्तर्हि अनुत्तरपदस्थस्यैवेति। किन्तु यदा 'अप्रत्ययस्य' इति पदस्य 'प्रत्ययसम्बन्धिभिन्नस्य' इत्यर्थः तदा 'इसुसोः' इति अप्राप्तविभाषा। अतः 'नित्यं समासे...' इति विध्यर्थमेव। तर्हि प्रकृतसूत्रे  नित्यग्रहणं तु  स्पष्टार्थं बोध्यम् एवञ्च अव्यपेक्षायाम्

[11] समासशक्तिदीपिका- श्लोकसंख्या-2

अप्राप्तषत्वविधानेन चारितार्थ्यात्। तथा व्यपेक्षायां  कस्कादिसूत्रस्य असिद्धत्वात् विकल्प एवेति। इत्थं भिन्नं भिन्नं मतमत्र सन्दर्भे उभयत्र प्रतिपादितम्। अत्र दीनबन्धुझामहोदयस्य तथा नागेशभट्टस्य मतन्तु प्रायः समानमेव दृश्यते।

# सन्दर्भग्रन्थसूची

**क्रं. ग्रन्थः (भाग), ग्रन्थकर्त्ता, सम्पादकः / टीकाकर्त्ता, संस्करणम्- वर्षम्, प्रकाशनम्- स्थानम्।**


1. लघुसिद्धान्तकौमुदी (5),वरदराजाचार्यः,भीमसेन शास्त्री, द्वितीयम् -2006, भैमीप्रकाशनम् -दिल्ली।
2. अष्टाध्यायीसूत्रपाठः, पाणिनिः,पुष्पादीक्षितः,प्रथमम्-2010,संस्कृतभारती- नई दिल्ली।
3. तर्कसङ्ग्रहः,अन्नम्भट्टः,केदारनाथत्रिपाठी,द्वितीयम्,1985,मोतीलालबनारसीदासः-दिल्ली।
4. वैयाकरणसिद्धान्तकौमुदी(1,2),भट्टोजिदीक्षितः,गिरिधरशर्मा,परमेश्वरानन्दशर्मा,एकादशतमम्-2004,मोतीलालबनारसीदासः-दिल्ली।
5. सिद्धान्तरत्नाकरः(1),रामकृष्णभट्टः,आजादमिश्रः,प्रथमम्-1995,साहित्य शिल्पी-लखनऊ।
6. वैयाकरणसिद्धान्तकौमुदी(1),भट्टोजिदीक्षितः,गुरुप्रसादशास्त्री,प्रथमम्-2012, चौखम्बा सुरभारती-वाराणसी।
7. वैयाकरणसिद्धान्तकौमुदी(1,2),भट्टोजिदीक्षितः,गोविन्दाचार्यः,लक्ष्मीशर्मा,प्रथमम्-2016,चौखम्बा सुरभारती-वाराणसी।
8. कौमुदीमूलार्थविद्योतिनी, दीनबन्धुझा, शशिनाथझा, प्रथमम्- 1986, कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः-दरभङ्गा।
9. समासशक्तिदीपिका, दीनबन्धुझा, शशिनाथझा, प्रथमम्- 2000, कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः-दरभङ्गा।